श्री रुद्र स्तुतिः

श्री रुद्र स्तुतिः

नमो देवाय महते देवदेवाय शूलिने |
त्र्यंबकाय त्रिनेत्राय योगिनां पतये नमः || 1 ||

नमोऽस्तु देवदेवाय महादेवाय वेधसे |
शंभवे स्थाणवे नित्यं शिवाय परमात्मने || 2 ||

नमः सोमाय रुद्राय महाग्रासाय हेतवे |
प्रपद्येहं विरूपाक्षं शरण्यं ब्रह्मचारिणं || 3 ||

महादेवं महायोगमीशानं त्वंबिकापतिं |
योगिनां योगदाकारं योगमायासमाहृतं || 4 ||

योगिनां गुरुमाचार्यं योगगम्यं सनातनं |
संसारतारणं रुद्रं ब्रह्माणं ब्रह्मणोऽधिपं || 5 ||

शाश्वतं सर्वगं शांतं ब्रह्माणं ब्राह्मणप्रियं |
कपर्दिनं कळामूर्तिममूर्तिममरेश्वरं || 6 ||

एकमूर्तिं महामूर्तिं वेदवेद्यं सतां गतिं |
नीलकंठं विश्वमूर्तिं व्यापिनं विश्वरेतसं || 7 ||

कालाग्निं कालदहनं कामिनं कामनाशनं |
नमामि गिरिशं देवं चंद्रावयवभूषणं || 8 ||

त्रिलोचनं लेलिहानमादित्यं परमेष्ठिनं |
उग्रं पशुपतिं भीमं भास्करं तमसः परं || 9 ||

इति श्रीकूर्मपुराणे व्यासोक्त रुद्रस्तुतिः ||